Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy



कौमारी→ जपते-आख्यितये।
सूर्यादि→ जपते आख्ये तये।
नामकरण यात्रा→ अजिबोये कुलेचास व्रतिकि, द्वैथिरणाय भाकलं तिये।
अन्नप्राशन यात्रा→ अजिबोये आयुष्मीयें उपरिहा गरेगुन्नालं तिये।
क्षेत्रपाल→ जपते-आख्यितये।
सूर्यादि→ जपते आख्ये तये।
गणेश→ जपते आख्ये गोन्ने।

अथ कलशार्चनविधिः ॥ ॥ यजमान आचमन याये ॥ सिद्धिरस्तिये ॥ ॐ यदद्य कच्च वृत्रहन्नुदगा ऽ अभिसूर्य्य ॥ सर्वन्तदिन्द्र ते वशे ॥ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ॥ विश्वमा भासिरोचनम् ॥ स्वाहृये ॥ ॐ याः फलिनीर्या ऽ अफला ऽ अपुष्पा याश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानो मुञ्चन्त्व ऽ हसः ॥ ॥ तिलकुशजलकया संकल्पयाये ॥ अद्य ॐ तत्सत् ३ ॥ विष्णुः ३ ॥ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ ॐ अस्य श्रीमद्भगवतो महापुरुषस्य श्रीमदादिनारायणस्य अचिन्त्यापरिमितशक्त्या आजमानस्य श्रीविष्णोर्निजमायाकल्पितानां महाजलैघमध्यपरिभ्रममाणानाम् अनेककोटिब्रह्माण्डानामेकतमे अव्यक्त महदहंकार पृथिव्यप्तेजो वाय्वाकाशाद्यावरणैरावृते अस्मिन्महतिब्रह्माण्डखण्डे पञ्चाशत्कोटियोजनविस्तीर्णे भू

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

मण्डले लवणसमुद्रपरिवेष्टिते सप्तद्वीपमध्यवर्तिनि जम्बूद्वीपे इलावृतादि नवखण्डानां मध्ये नवसहस्रयोजनविस्तीर्णे मरतखण्डे तत्रापि परमपवित्रे भारतवर्षे आर्यावर्तान्तर्गते ब्रह्मावर्तैकदेशे हिमवतो दक्षिणपार्श्वे हरिवर्षकिम्पुरुषयोश्च दक्षिणे पादे श्रीशैलोत्तरे पादे श्लेष्मान्तकारण्ये गण्डकीकौशिक्योर्मध्ये नद्योरभ्यर्च वज्रयोगिन्योरंतराले अङ्गवङ्गादि पञ्चाशद्देशानां मध्ये त्रयोविंशतितमे नेपालमण्डले अनेकतीर्थशिवलिंगादि विराजिते पशुपतिसन्निधाने वासुकीक्षेत्रे वाग्मत्या ···· भागे प्रभावत्या ···· भागे श्रीमन्नेपालान्तर्गते ···· पुरराज्ये प्रसिद्धे नगरे ···· देवता भट्टारकस्थाने इहैव पुण्यभूमौ ॥ इति देशकीर्तनम् ॥ अथ कालकीर्तनम् ॥ श्रीमन्नारायणनाभिकमलोद्भूतस्य जगत्स्रष्टुः परार्द्धद्वयजीविनो ब्रह्मणो द्वितीये परार्द्धे श्वेतपञ्चाशत्तमे वर्षे प्रथममासे प्रथमदिवसे अहो द्वितीये यामे तृतीये मुहूर्ते अनन्तादि सप्त

कल्पानां मध्ये श्रीश्वेतवाराहकल्पे स्वायम्भुवादि चतुर्दशमन्वन्तराणां मध्ये सप्तमे वैवस्वत मन्वन्तरे मत्स्यादि दशावताराणां मध्ये नवमे बौद्धावतारे कृतादि चतुर्युगानां मध्ये वर्तमाने अष्टाविंशतितमे द्वात्रिंशत्सहस्रान्वित चतुर्लक्षाब्दे कलियुगे युधिष्ठिरादि षट् चक्रवर्तिनां मध्ये श्रीमद्विक्रमीये ···· मिताब्दे व्यावहारिक चान्द्रमान सौरमान बार्हस्पत्यमानादिकालभ्रमित प्रभवादि षष्टिसंवत्सराणांमध्ये ···· नाम संवत्सरे श्रीसूर्ये ···· अयने ···· ऋतौ मासानाम् उत्तमे मासे इत्यादि पञ्चाङ्ग उच्चारणयाये ॥ अनाद्यविद्यावासनया प्रवर्तमाने अस्मिन्महति संसारचक्रे केनापि पुण्यविशेषेण इदानीं मानुष्ये जन्म प्राप्तवतः ॥ ॥ ···· गोत्रस्य यजमानस्य ···· स्य ···· निमित्तक कलशार्चनब्राह्मणद्वारा अहं कारयिष्ये ॥ तत्कर्म कर्तुं भगवते श्रीसूर्यायार्घ्यं नमः ॥ भास्कराय पुष्पंनमः ॥ ॐ मोहान्धकारमग्नानां जनानां ज्ञानरश्मिभिः ॥ कृतमुद्धरणं येन तन्नौमि शिव भास्करम् ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

भास्कराय धूपं नमः ॥ पूजाभः लः थलथिये ॥ सिद्धिरस्तु क्रियारम्भे वृद्धिरस्तु धनागमे॥ पुष्टिरस्तु शरीरेषु शान्तिरस्तु ग्रहादिषु॥ सर्वविघ्नप्रशमनं सर्वशान्तिकरं शुभम् ॥ आयुः पुत्रं च कामं च लक्ष्मीसन्तानवर्धनम् ॥ यथा वोणप्रहाराणां कवचं भवति वारणम् ॥ तद्वद्दैवविघातानां शान्तिर्भवतु वारणम् ॥ कमण्डलुपुष्पभाजनं नमस्करोमि ॥ सुकुन्दास गणेश दीप पूजा याये ॥ ॐ विघ्नहर्त्रे गणपतये इदमासनं नमः ॥ पुष्पं नमः ॥ पादार्घं नमः ॥ हस्तार्घं नमः ॥ प्रत्यर्घं नमः ॥ चन्दनाक्षतपुष्पं नमः ॥ स्तोत्र ॥ ॐ विघ्नेश्वराय वीराय विश्वरूपायते नमः ॥ सर्वविघ्नहरं देवं सर्वशान्तिं नमाम्यहम् ॥ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटि युगधारिणे नमः ॥ गणाधिपार्चनविधौ तत्सर्वं विधिपरिपूर्णमस्तु ॥ दीपनारायणार्चनविधौ तत्सर्वं विधिपरिपूर्णमस्तु ॥ विघ्नहर्

ती गणपतिः सुप्रसन्नोऽस्तु ॥ कलशपूजा॥ ॐ सम्पूर्णकलशाय मृत्युञ्जयाय अमृतेश्वरीशक्तिसहिताय इदमासनं नमः ॥ पुष्पंनमः ॥ गणपत्यादि सांगेभ्यः सगणपरिवारेभ्य इदमासनं नमः ॥ पुष्पं नमः ॥ पादार्घं नमः ॥ हस्तार्घं नमः ॥ प्रत्यर्घं नमः ॥ आवाहनस्थापन चन्दनाक्षत पुष्पं नमः ॥ स्तोत्र ॥ ॐ उमान्वितं कुन्दविकासवर्णं देवाधिनाथं वृषभासनस्थम् ॥ त्रिशूलहस्तं त्वभयाक्षमालं मृत्युञ्जयं वै प्रणमामि नित्यम् ॥ अत्रगन्धार्चनविधौ तत्सर्वं विधिपरिपूर्णमस्तु ॥ ब्राह्मणपूजा ॥ यजुर्वेदाध्यायिने ब्राह्मणाय इदमासनं नमः ॥ पुष्पं नमः ॥ हस्तार्घं नमः ॥ प्रत्यर्घं नमः ॥ चन्दनं नमः ॥ सिन्दूरं नमः ॥ अक्षतान्नमः ॥ सयज्ञोपवीत पुष्पं नमः ॥ यजमानं ब्राह्मणयात पूजाभः लः थल लव ह्लाये ॥ पूर्वोक्तकर्मणे यजुर्वेदाध्यायिने ब्राह्मणाय कमण्डलुपुष्पभाजनं समर्पयामि ॥ थुलि यजमानं याये ॥ ॥ अनंलि ब्राह्मणं पूजायाये ॥ अर्घासचीसांजा

CC0. Herambanandal Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

कितया जोना सूर्यार्घ यांये ॥ अद्य ॐ तत्स
त् इत्यादि ह्यापार्थं बोने ॥ .... गोत्रस्य य
जमानस्य .... नामधेयस्य .... स्य .....
नैमित्तिक कलशार्चनं कर्तुं भगवते श्रीसूर्या
यार्घ्यं नमः ॥ ॐ आकृष्णेन रजसा वर्तमा
नो निवेशयन्नमृतं मर्त्यञ्च ॥ हिरण्ययेन
सविता रथेना देवो याति भुवनानि पश्यन् ॥
भास्कराय इदमासनं नमः ॥ भास्कराय पु
ष्पं नमः ॥ भास्कराय धूपं नमः ॥ मण्डल
दर्यंक ॥ चौसां जाकि तया पूजा यांये ॥ अ
खण्डमण्डलाकारं व्याप्तं येन चराचरम् ॥
तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः ॥ मंड
लया स्वांकया हुये ॥ मण्डल स्यंका लाहासि
ले ॥ प्राणायाम न्यासं ॥ अर्घपात्रपूजा या
ये ॥ ॐ ब्रह्मणे नमः ॥ विष्णवे नमः ॥ रु
द्राय नमः ॥ ईश्वराय नमः ॥ सदाशिवायन
मः ॥ वरुणमूर्तये चन्दनाक्षतपुष्पं नमः ॥
धेनुमुद्रां दर्शयेत् ॥ आत्मपूजा ॥ आत्मने
सिञ्चनं नमः ॥ आत्मने चन्दनं नमः ॥ आ

त्मने पुष्पं नमः ॥ आत्मासनाय नमः ॥ आत्म
मूर्तये नमः ॥ गणेशदीपपूजा ॥ ॐ विघ्नहर्त्रे
गणपतये दीपनारायणाय च इदमासनं नमः
॥ पुष्पं नमः ॥ पादार्घं नमः ॥ हस्तार्घं नमः ॥
प्रत्यर्घं नमः ॥ आवाहनस्थापन चन्दनाक्षत
पुष्पं नमः ॥ स्तोत्र ॥ ॐ विघ्नेश्वराय वीरायवि
श्वरूपाय ते नमः ॥ सर्वविघ्नहरं देवं सर्वशान्ति
नमाम्यहम् ॥ ॐ नमोस्त्वनन्ताय सहस्रमूर्त
ये सहस्रपादाक्षिशिरोरु बाहवे ॥ सहस्रनाम्ने
पुरुषाय शाश्वते सहस्रकोटीयुगधारिणेनमः
॥ गणाधिपार्चन विधौ दीपनारायणार्चनविधौ
तत्सर्वं विधिपरिपूर्णमस्तु ॥ कलशपूजा ॥ ॐ
सम्पूर्णकलशाय मृत्युञ्जयाय अमृतेश्वरीश
क्तिसहिताय इदमासनं नमः ॥ पुष्पंनमः ॥ग
णपत्यादि साङ्गेभ्यः सगणपरिवारेभ्य इदमा
सनं नमः ॥ पुष्पं नमः ॥ ॥ द्वारार्चन ॥ ॥
ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्तेय
जमानो हविर्भिः ॥ अहेडमानो वरुणेहवोध्यु
रुशꣳ समानऽआयुः प्रमोषीः ॥ १ ॥ त्वमग्ने

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मन स्परि ॥ त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वन्नृणां नृपते जायसे शुचिः ॥ २ ॥ देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ ३ ॥ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेननो घृतप्वः पुनन्तु ॥ विश्वंहिरिप्रम्प्रवहन्तिदेवीरुदिदाभ्यःसुचिरापूतऽएमि ॥ ४ ॥ यस्यकुर्मोगृहेहविस्तमग्नेवर्द्धयात्व [illegible] देवाऽअधिब्रवन्नयञ्चब्रह्मणस्पतिः ॥ ५ ॥ यदक्रन्दःप्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्यम्महिजातंतेऽअर्वन् ॥ ६ ॥ पद्मानेनेपद्मऽऊरूपद्माक्षिपद्मसम्भवे ॥ तन्मेभजसिपद्माक्षितेनसौख्यंलभाम्यहम् ॥ ७ ॥ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानःशर्म्मसप्रथाः ॥ ८ ॥ येतेपन्थाःसवितःपूर्व्यासोरेणवःसुकृताऽअन्तरिक्षे ॥ तेभिर्नोऽअद्यपथिभिःसुगेभीरक्षाचनोऽधिचब्रूहिदेव ॥ ९ ॥

आमन्द्रैरिन्द्रहरिभिर्याहिमयूररोमभिः ॥ माक्वोकश्चिन्नियमन्विन्नपाशिनेतिबन्धवतेऽईहि ॥ १० ॥ द्वारोदेवीरन्वस्यविश्वेव्रतादर्दतेऽअग्नेः ॥ उरुव्यचसोधाम्नापत्यमानाः ॥ ॥ ११ ॥ चत्वारिशृङ्गात्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँऽआविवेश ॥ १२ ॥ युञ्जतेमनऽउतयुञ्जतेधियोविप्राविप्रस्यबृहतोविपश्चितः ॥ विहोत्रादधेवयुनाविदेकऽइन्महीदेवस्यसवितुःपरिष्टुतिः ॥ १३ ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरे ॥ १४ ॥ अग्निमीलेपुरोहितंयज्ञस्यदेवमृत्विजम् ॥ होतारंरत्नधातमम् ॥ १५ ॥ इषेत्वोर्जेत्वावायवस्थदेवोवःसविताप्रार्पयतुश्रेष्ठतमायकर्म्मणऽआप्यायध्वमघ्न्याऽइन्द्रायभागमप्रजावतीरनमीवाऽअयक्ष्माामावस्तेनऽईशतमाघशꣳसोध्रुवाऽअस्मिन्गोपतौस्यात्बह्वीर्यजमानस्यपशून्पाहि ॥ १६ ॥ अग्नऽआयाहिवीतयेगृणानोहव्यदातयेनि

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

होतासत्सि बर्हिषि ॥ १७ ॥ शन्नोदेवीरभि
ष्टय आपो भवन्तु पीतये ॥ शंयोरभिस्र
वन्तु नः ॥ १८ ॥ उपह्वरे गिरीणां ꣳ सङ्गमे
च नदीनाम् ॥ धिया विप्रोऽअजायत ॥ १९ ॥
नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो नैषादं पुरु
षव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्यो ब्रात्यं प्रयु
ग्भ्यऽउन्मत्तꣳ सर्पदेवजनेभ्यो प्रतिपदम
येभ्यः कितवमीर्यतायाऽअकितवं पिशाचे
भ्यो विदलकारीं यातुधानेभ्यः कण्टकीकारी
म् ॥ २० ॥ गणानान्त्वा गणपतिꣳ हवामहे
प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनांत्वा
निधिपतिꣳ हवामहे वसो मम ॥ आहमजा
नि गर्भधमात्वमजासि गर्भधम् ॥ २१ ॥ बृ
हस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्र
तुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजात
तदस्मासुद्रविणं धेहिचित्रम् ॥ २२ ॥ पाव
कानः सरस्वतीवाजेभिर्वाजिनीवति ॥ यज्ञं
वष्टुधियावसुः ॥ २३ ॥ श्वेतलक्ष्मीश्च प
त्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौव्या

त्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्वलो
कम्मऽइषाण ॥ २४ ॥ अस्माकमिन्द्रः स
मृतेषुध्वजेष्वस्माकंयाऽइषवस्ताजयन्तु ॥
अस्माकंवीराऽउत्तरे भवन्त्वस्मॉ ꣳ उदेवाऽ
अवताहवेषु ॥ २५ ॥ नमोवव्रेऽस्तुशाय व्या
धिनेऽन्नानाम्पतये नमो नमो भवस्यहेत्यै ज
गताम्पतये नमोनमो रुद्रायाततायिने क्षेत्रा
णाम्पतये नमोनमः सूतायाहन्त्यै वनानाम्प
तये नमोनमः ॥ २६ ॥ सप्तयुञ्जन्तिरथमे
कचक्रमेकोऽअश्वोवहतिसप्तनामा ॥ त्रि
नाभिचक्रमजरमनर्वं यत्रेमाविश्वाभुवना
धितस्थुः ॥ २७ ॥ असौयस्ताम्रोऽअरुणऽ
उतबभ्रुः सुमङ्गलः ॥ येचैनꣳ रुद्राऽअ
भितोदिक्षुश्रिताः सहस्रशोवैषाꣳ हेडऽईम
हे ॥ २८ ॥ ॥ सुमङ्गलद्वारार्चनविधानत
त्सर्वं विधिपरिपूर्णमस्तु ॥ शुलिद्वारार्चन ॥
अथ कलशपूजा ॥ ॐ सम्पूर्णकलशाय मृ
त्युञ्जयाय अमृतेश्वरीशक्तिसहिताय इदमा
सनं नमः ॥ पुष्पं नमः ॥ आधारादिशक्त्यास

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

नाय नमः ॥ वृषभासनाय नमः ॥ सिंहासना
य नमः ॥ ध्यानम् ॥ ॐ वृषसिंहस्थितं देवं
क्षीरकुन्देन्दुसन्निभम् ॥ एकवक्त्रं त्रिनेत्रंच
चतुर्भुजं महेश्वरम् ॥ त्रिशूलाक्षधरं देवं वरं
कलशधारिणम् ॥ वामोरुस्थ गतादेवी द्विभु
जा कलशावरा ॥ हेमाभरणभूषाङ्गी श्वेतांवर
विभूषणा ॥ स्वामृतेश्वरं ध्यात्वा सर्वपापप्रणा
शनम् ॥ सम्पूर्ण कलशाय ध्यानपुष्पं नमः ॥
पादार्घं नमः ॥ हस्तार्घं नमः ॥ प्रत्यर्घं नमः ॥
स्नान ॥ ॐ स्वस्तिन ऽइन्द्रो वृद्ध श्रवाः स्वस्ति
नः पूषा विश्ववेदाः ॥ स्वस्तिनस्तार्क्षो ऽअरिष्ट
नेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ सम्पूर्णकल
शाय साङ्गाय सगणपरिवाराय स्नानं नमः ॥
चन्दन ॥ ॐ यदद्यकच्चवृत्रहन्नुदगाऽ अभि
सूर्य ॥ सर्वं तदिन्द्रतेवशे ॥ तरणिर्विश्वदर्शतो
ज्योतिष्कृदसि सूर्य ॥ विश्वमा भासिरोचनम्
॥ सम्पूर्ण कलशाय साङ्गाय सगणपरिवारा
य चन्दनं नमः ॥ सिन्दूर ॥ ॐ त्वंन्यविष्ठदा
शुषेनृः पाहि शृणुधीगिरः ॥ रक्षातोकमुत

त्मना ॥ सम्पूर्ण कलशाय साङ्गाय सगण
परिवाराय सिन्दूरं नमः ॥ अक्षत ॥ ॐ अ
क्षन्नमी मदन्त ह्यवप्रिया ऽअधूषत ॥ अस्तो
षतस्वभानवोविप्रानविष्ठयामतीयोजान्वि
न्द्रतेहरी ॥ सम्पूर्ण कलशाय साङ्गाय सगण
परिवाराय अक्षतान्नमः ॥ यज्ञोपवीत ॥ ॐ
नमोस्तुनीलग्रीवाय सहस्राक्षायमीढुषे ॥
अथोयेऽअस्यसत्वानोहन्तेभ्योकरन्नमः ॥
सम्पूर्ण कलशाय साङ्गाय सगणपरिवाराय
यज्ञोपवीतं नमः ॥ पुष्प ॥ ॐ याः फलिनी
र्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः ॥ बृ
हस्पतिप्रसूतास्तानोमुञ्चन्त्वंहसः ॥ सम्पू
र्णकलशाय साङ्गाय सगणपरिवारायपुष्पं न
मः ॥ जाकिं पूजायाये ॥ ॐ आजिघ्रकलशं
मह्यात्वाविशन्त्विन्दवः ॥ पुनरूर्जानिवर्तस्व
सानः सहस्रं धुक्षोरुधारापयस्वती पुनर्मावि
शताद्रयि ॥ ॐ गङ्गायै नमः ॥ ॐ इमंमे ग
ङ्गे यमुने सरस्वति शुतुद्रिस्तोमं सचता परु
ष्ण्या ॥ असिक्न्या मरुद्वृधे वितस्तयार्जीकी

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

ये शृणु ह्या सुखेमया ॥ ॐ यमुनायै नमः ॥
ॐ सितासिते सरिते यत्र संगमे तत्रा प्लुतासो
दिवमुत्पतन्ति ॥ येवै तन्वं विसृजन्ति धीरा
स्तेवै जनासोऽ अमृतत्वं भजन्ते ॥ ॐ सरस्वत्यै
नमः ॥ ॐ पञ्चनद्यः सरस्वतीमपियन्तिस
स्रोतसः ॥ सरस्वती तु पञ्चधासो देशे भवत्स
रित् ॥ ॐ वरुणाय नमः ॥ ॐ वरुणस्योत्तंभ
नमसि वरुणस्यस्कम्भसर्जनीस्थो वरुणस्यऽ
ऋतसदन्यसि वरुणस्यऽऋतसदनमसिव
रुणस्यऽ ऋतसदनमासीद ॥ ॐ ब्रह्मणे नमः
॥ ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः
सुरुचोवेनऽ आवः ॥ सबुध्न्याऽउपमाऽअ
स्यविष्ठाः सतश्चयोनिमसतश्चविवः ॥ ॐ वि
ष्णवे नमः ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधानिद
धेपदम् ॥ समूढमस्य पा ꣳ सुरे ॥ ॐ शिवा
यनमः ॥ ॐ नमः शम्भवायचमयोभवाय
चनमः शङ्कायचमयस्कायचनमः शिवा
यचशिवतरायच ॥ ॐ मृत्युञ्जयायनमः
॥ ॐ त्र्यम्बकꣳ यजामहे सुगन्धिम्पुष्टिवर्द्धन

म् ॥ उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृता
त् ॥ त्र्यम्बकꣳ यजामहे सुगन्धिम्पतिवेदनम्॥
उर्वारुकमिव बन्धनादितोमुक्षीयमामुतः ॥ ॐ
ॐ श्रियै नमः ॥ ॐ श्रीश्चतेलक्ष्मीश्च पत्न्यावा
होरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइ
षाण ॥ ॥ इति कलशार्चनम् ॥ अथ सगु
णपूजा ॥ ॐ अस्वत्थामाबृहचिरञ्जीविभ्य
इदमासनं नमः ॥ पुष्पं नमः ॥ ॐ ब्राह्मणा
सः पितरः सोम्यासः शिवेनो द्यावापृथिवी ऽ
अनेहसा ॥ पूषानः पातुदुरितादृतावृधोरक्षा
माकिर्नोऽ अघशꣳसऽ ईशत ॥ ॐ महीद्यौः
पृथिवी चनऽ इमं यज्ञम्मिमिक्षताम् ॥ पिपृ
तान्नो भरीमभिः ॥ ॐ यस्यकुर्म्मो गृहे हवि
स्तमग्ने वर्द्धयात्त्वम् ॥ तस्मेदेवाऽ अधिब्रव
न्नयञ्च ब्रह्मणस्पतिः ॥ ॐ तीव्रान्घोषान्कृ
ण्वतेवृषपाणयोश्वारथेभिः सहवाजयन्तः॥
अवक्रामन्तः प्रपदैरमित्रान्क्षिणन्तिशत्रूँ
रनपव्ययन्तः ॥ ॐ रक्षसाम्भागोसिनिरस्त

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

ह रक्ष ऽ इदमह ह रक्षोभितिष्ठामीदमह ह र
क्षोवबाध ऽ इदमह ह रक्षो धमन्तमो नयामि॥
घृतेन द्यावा पृथिवी प्रोर्णुवाथां वायो वेस्तोकाना
मग्नि राज्यस्य वेतु स्वाहा स्वाहा कृते ऽ ऊर्द्ध नभ
स्म्मारुतङ्गच्छतम् ॥ ॐ अय ह सहस्रमृषि
भिः सहस्कृतः समुद्र ऽ इवपप्रथे ॥ सत्यः सोऽ
अस्य महिमा गृणेशवो यज्ञेषु विप्रराज्ये ॥ ॐ
प्रजापतेनत्त्वदेतान्न्यन्न्यो विश्वारूपाणि परिता
बभूव ॥ यत्कामास्ते जुहुमस्तन्नो ऽ अस्तु वय
ꣳ स्याम पतयो रयीणाम् ॥ ॐ सप्तऋषयःप्र
तिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् ॥
सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो ऽअस्व
प्नजौ सत्रसदौ च देवौ ॥ ॐ दधिक्राव्णो ऽअका
रिषञ्जिष्णो ऽरश्वस्य वाजिनः ॥ सुरभिनो मु
खा करत्प्रण ऽ आयू ꣳषितारिषत् ॥ ॥इति
सगुण पूजा ॥ ॥ कार्यया विशेष पूजानंयाये॥
अथ गणेशपूजा ॥ ॐ गणपतयेइदमासनं
नमः ॥ पुष्पं नमः ॥ ॐ गणानान्त्वा गणपति
ꣳ हवामहे प्रियाणान्त्वा प्रियपति ꣳ हवामहेनि

धीनान्त्वा निधिपति ꣳ हवामह वसो मम ॥ आ
हमजानि गर्भधमात्वमजासि गर्भधम् ॥ ॐ
नमो गणेभ्यो गणपति भ्यश्चवो नमो नमो व्रात
भ्यो व्रातपति भ्यश्चवो नमो नमो गृत्सेभ्योगृत्स
पति भ्यश्चवो नमो नमो विरूपेभ्यो विश्वरूपे
भ्यश्चवो नमो नमः ॥ ॐ मनोमे तर्पयत वा
चम्मे तर्पयत प्राणम्मे तर्पयत चक्षुर्मे तर्पय
त श्रोत्रम्मे तर्पयतात्मानम्मे तर्पयत प्रजाम्मे
तर्पयत पशून्मे तर्पयत गणान्मे तर्पयतगणा
मेमा वितृषन् ॥ ॥ इतिगणेशपूजा ॥ ॥
अथ क्षेत्रपालपूजा ॥ ॐ स्वस्थान क्षेत्रपाला
य इदमासनं नमः ॥ पुष्पं नमः ॥ ॐ असङ्ख
ख्याता सहस्राणियेरुद्रा ऽ अधिभूम्याम् ॥ते
षाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥ ॐ
नमोबभ्लुशाय व्याधिने न्नानाम्पतये नमो
नमो भवस्य हेत्यै जगताम्पतये नमो नमो रु
द्रायातताविने क्षेत्राणाम्पतये नमोनमःसूता
य्याहन्त्यै वनानाम्पतये नमोनमः ॥ ॐजातवे
दसे सुनवामसोममरातीयतोनिदहातिवेदः॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

सनः पर्षदति दुर्गाणि विश्वानावेव सिन्धुन्दुरि
तात्यग्निः ॥ ॐ अध्यवोचदधिवक्ता प्रथमो दै
व्योभिषक् ॥ अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च
यातुधान्यो धराचीः परासुव ॥ ॥ इति क्षेत्र
पालपूजा ॥ ॥ अथ गोमातृकापूजा ॥ ॐ
कपिलादि पञ्चगोमातृकाभ्य इदमासनं नमः
॥ पुष्पं नमः ॥ ॐ आयङ्गौः पृश्निरक्रमीदसद
न्मातरम्पुरः ॥ पितरञ्चप्रयन्त्स्वः ॥ ॐ अ
दितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता सपितास
पुत्रः ॥ विश्वेदेवाऽअदितिः पञ्चजनाऽअदि
तिर्जातमदितिर्जनित्वम् ॥ ॐ मानस्तोकेतनये
मानऽआयुषिमानो गोषुमानोऽअश्वेषुरीरिषः
॥ मानो वीराञ्रुद्रभामिनोवधीर्हविष्मन्तः सद
मित्वा हवामहे ॥ ॐ इषेत्वोर्जे त्वावायवस्थ देवो
वः सविता प्रार्पयतुश्रेष्ठतमाय कर्म्मणऽआप्या
यध्वमघ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवा
ऽअयक्ष्मामावस्तेनऽईशतमाघशꣳसोध्रुवाऽ
अस्मिन्गोपतौस्यात बह्वीर्य्यजमानस्य पशून्पा
हि ॥ ॐ समक्रन्ददेव्याधिया सन्दक्षिणयोरु

चक्षसा ॥ मामऽआयुःप्रमोषीर्म्मोऽअहं तव
वीरंविदेयतवदेविसन्दृशि ॥ ॥ इति गोमातृ
कापूजा ॥ ॥ अथ कौमारीपूजा ॥ ॥ ॐ
कौमारीदेव्यै इदमासनं नमः ॥ पुष्पं नमः ॥ ॐ
ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव
नऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाः स
तश्चयोनिमसतश्चविवः ॥ ॐ नमः शम्भवाय
चमयोभवायचनमः शङ्कायचमयस्कराय
चनमः शिवायचशिवतरायच ॥ ॐ यत्रवा
णाः सम्पतन्तिकुमारा विशिखाऽइव ॥ तत्रन
इन्द्रोबृहस्पतिरदितिः शर्म्मयच्छतुविश्वाहा
शर्म्मयच्छतु ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानि
दधेपदम् ॥ समूढमस्यपाꣳसुरे ॥ ॐ यस्य
कुर्म्मोगृहेहविस्तमग्नेवर्द्धयात्वम् ॥ तस्मैदेवाऽ
अधिब्रवन्नयञ्चब्रह्मणस्पतिः ॥ ॐ इन्द्रन्नैवी
र्विशोमरुतोनुवर्त्मानोभवन्त्यथेन्द्रन्नैवीर्वि
शोमरुतोनुवर्त्मानोभवन् ॥ स्वमिमंय्यज
मानन्नैवीश्चविशोमानुषीश्चानुवर्त्मानोभ
वन्तु ॥ ॐ जातवेदसेसुनवामसोममरातीयतो

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

निदहातिवेदः ॥ सनः पर्षदतिदुर्गाणिविश्वानावेवसिन्धुरितात्यग्निः ॥ ॐ अम्बेऽअम्बिकेऽम्बालिकेनमानयतिकश्चनः ॥ ससस्त्यश्वकः सुभद्रिकाकाम्पीलवासिनीम् ॥ इति कौमारीपूजा ॥ ॥ ततः सूर्यादिपूजा ॥ ॐ सूर्यादिसाङ्गेभ्यः सगणपरिवारेभ्य इदमासनं नमः ॥ पुष्पं नमः ॥ ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ॥ हिरण्ययेन सविता रथेना देवो याति भुवनानिपश्यन् ॥ ॐ इदंविष्णुर्विचक्रमे त्रेधानिदधे पदम् ॥ समूढमस्यपाꣳसुरे ॥ ॐ नमः शम्भवाय चमयोभवाय चनमः शङ्कराय चमयस्कराय चनमः शिवाय चशिवतराय च ॥ ॐ गणानान्त्वा गणपतिꣳहवामहे प्रियाणान्त्वा प्रियपतिꣳहवामहे निधीनान्त्वा निधिपतिꣳहवामहे वसो मम ॥ आहमजानिगर्भधमात्वमजासि गर्भधम् ॥ ॐ नमोवभ्लुशाय व्याधिनेऽनानाम्पतये नमो भवस्यहेत्यैजगतांम्पतये नमोनमो रुद्रायाततायिनेक्षेत्राणांपतये नमोनमः सूतायाहन्त्यैवनानाम्पतये नमो

नमः ॥ ॐ तीव्रान्घोषान्कृण्वतेवृषपाणयोऽश्वारथेभिः सहवाजयन्तः ॥ अवक्रामन्तः प्रपदैरमित्रान्क्षिणन्तिशत्रूरनपव्ययन्तः ॥ ॐ नमोऽस्तुसर्पेभ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेभ्यः सर्पेभ्योनमः ॥ ॐ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः ॥ सनः पर्षदतिदुर्गाणिविश्वानावेवसिन्धुरितात्यग्निः ॥ ॐ नमः शङ्कवेचपशुपतयेचनमऽउग्रायचभीमायचनमोग्रेवधायचदूरेवधायचनमोहन्त्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्ताराय ॥ ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणंधेहिचित्रम् ॥ ॐ श्रोश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण ॥ ॐ पावकाः सरस्वतीवाजेभिर्वाजिनीवति ॥ यज्ञंवष्टुधियावसुः ॥ ॐ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ॥ सम्बाहुभ्याधमतिसम्पतत्रै

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy.

द्यौर्वा भूमी जनयन्देव ऽएकः ॥ इति सूर्यादि पू
जा ॥ ॥ अथ ग्रहपूजा ॥ ॐ आदित्यादि न
वग्रहेभ्य इदमासनं नमः ॥ पुष्पं नमः ॥ ॐ आ
कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च
॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि
पश्यन् ॥ ॐ इमन्देवाऽ असपत्नꣳ सुवध्वं मह
ते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्र
स्येन्द्रियाय ॥ इमममुष्य पुत्रममुष्यै पुत्रमस्यै
विशऽएषवोमीराजासोमोस्माकं ब्राह्मणानाꣳ
राजा ॥ ॐ अग्निर्मूर्द्धादिवः ककुत्पतिः पृथि
व्याऽअयम् ॥ अपा ꣳरेता ꣳसि जिन्वति ॥
ॐ उद्बुद्ध्वꣳ स्वाग्ने प्रतिजागृहि त्वमिष्टापूर्तꣳ स
सृजेथामयञ्च ॥ अस्मिन्त्सधस्थेऽअध्युत्त
रस्मिन्विश्वेदेवा यजमानश्च सीदत ॥ ॐ बृ
हस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्रतुम
ज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मा
सुद्रविणं धेहि चित्रम् ॥ ॐ अन्नात्परिस्रुतो
रसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयः सोमप्रजाप
तिः ॥ ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्ध

सऽइन्द्रेस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ॐ शं
नोदेवीरभिष्टयऽआपो भवन्तु पीतये ॥ शंयो
रभिस्रवन्तुनः ॥ ॐ कयानश्चित्रऽआभुवदूती
सदावृधः सखा ॥ कयाशचिष्ठयावृता ॥ ॐ क
तुंकृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे ॥ समुष
द्भिरजायथाः ॥ ॐ ताऽअस्यसूददोहसः सो
मꣳ श्रीणन्ति पृश्नयः ॥ जन्मन्देवानांविशस्त्रि
ष्वारोचनेदिवः ॥ इति ग्रहपूजा ॥ ॥ अथ इ
न्द्रादि दशदिक्पाल पूजा ॥ ॐ इन्द्रादि दशदि
क्पालेभ्य इदमासनं नमः ॥ पुष्पं नमः ॥ ॐ त्रा
तारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳ शू
रमिन्द्रम् ॥ ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ स्व
स्तिनोमघवाधात्विन्द्रः ॥ ॐ अग्निर्मूर्द्धा० ॥ ॐ
यमेनदत्तन्त्रितऽएनमाहुर्नगिन्द्रऽएणम्प्र
थमोऽअध्यतिष्ठत् ॥ गन्धर्वोऽअस्यरशना
मगृभ्णात्सूरादश्वंवसवोनिरतष्ट ॥ ॐ यन्नेद्र
वोनिर्ऋतिराबबन्धपाशाञ्छ्रीवास्वविच्यृत्यम् ॥
तन्तेविष्याम्यायुषोनमद्धायदैतम्पितुमद्धि
प्रसूतः ॥ नमोभूत्यैयेदञ्चकार ॥ ॐ इमंमेव

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

रुणश्चुधीहवमद्याचमृडय ॥ त्वामवस्युराच
के ॥ ॐ तववायवृतस्पतेत्वष्टुर्जामातरद्भुत॥
अवाꣳस्यावृणीमहे ॥ ॐ कुविदङ्गयवमतो
यवञ्चिद्यथादान्त्यनुपूर्वंवियूय ॥ इहेहैषाङ्कृ
णुहि भोजनानिये बर्हिषो नमऽउक्तिंव्यजोति
॥ ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं जि
न्वमवसेहूमहे वयम् ॥ पूषानो यथा वेदसाम
सद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ॐ त्रीणि
पदा विचक्रमे विष्णुर्गोपाऽअदाभ्यः ॥ अतो
धर्माणि धारयन् ॥ ॐ ब्रह्मणस्पते त्वमस्यय
न्तासूक्तस्य बोधितनयन्त्वाजिन्व ॥ विश्वं त
द्भद्रं यदवन्तिदेवा बृहद्वदेमविदथेसुवीराः ॥ ॥
इतिदशदिक्पाल पूजा ॥ ॥ अथ पञ्चलोक
पाल पूजा ॥ ॐ पञ्चलोकपालेभ्य इदमासनं
नमः ॥ पुष्पंनमः ॥ ॐ गणानान्त्वा गणपतिꣳ
हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहेनिधी
नान्त्वानिधिपतिꣳ हवामहेवसोमम ॥ आह
मजानिगर्भधमात्वमजासिगर्भधम् ॥ ॐ अ
म्बेऽअम्बिकेम्बालिकेनमानयतिकश्चनः ॥ स

सस्त्यश्वकः सुभद्रिकाकाम्पीलवासिनीम ॥ ॥
ॐ आनोनियुद्भिः शतिनीभिरध्वरꣳ सहस्रि
णीभिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्त्सव
नेमादयस्वयूयम्पातस्वस्तिभिः सदानः ॥ ॐ
घृतंघृतपावानःपिबतवसांवसापावानःपिबता
न्तरिक्षस्यहविरसिस्वाहा ॥ दिशःप्रदिशऽआ
दिशोविदिशऽउद्दिशोदिग्भ्यःस्वाहा ॥ ॐउ
भापिबतमश्विनोभानःशर्म्मयच्छतम् ॥ अ
विद्रियाभिरूतिभिः ॥ ॥ इतिपञ्चलोकपा
लपूजा ॥ ॥ अथपञ्चवक्त्रसदाशिवपूजा॥
ॐ पञ्चवक्त्रसदाशिवायइदमासनंनमः ॥
पुष्पंनमः ॥ ॐ सद्योजातोव्यमिमीतयज्ञम
ग्निर्देवानामभवत्पुरोगाः ॥ अस्यहोतुः प्रदि
शृतस्यवाचिस्वाहाकृतꣳहविरदन्तुदेवाः ॥
ॐ वाममद्यसवितर्वाममुसोदिवेदिववाममस्म
भ्यꣳसावीः ॥ वामस्यहिक्षयस्यदेवभूरेरया
धियावामभाजःस्याम ॥ ॐ यातेरुद्रशिवा त
नूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमया
गिरिशन्ताभिचाकशीहि ॥ ॐ यत्पुरुषंव्यद

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

भुः कल्पयन् ॥ मुखङ्कस्यासीत्
किम्बाहूकिमूरुपादाऽउच्येते ॥ ॐ तमीशा
नं जगतस्तस्थुषस्पतिं धियं जिन्वमवसेहूमहे
वयम् ॥ पूषानो यथा वेदसामसद्वृधेरक्षितापा
युरदब्धः स्वस्तये ॥ इति पञ्चवक्त्र सदाशिव
पूजा ॥ ॥ अथ मासादि पूजा ॥ ॐ मासादि
भ्य इदमासनं नमः ॥ पुष्पं नमः ॥ ॐ अर्द्धमा
साः परू ँषि तेमासाऽआकृत्या नुशम्मयतः ॥
अहोरात्राणिमरुतोविलिष्ट ऽसदयन्तुते ॥ ॐ
अग्नेः पक्षतिर्वायोर्न्निपक्षतिरिन्द्रस्य तृतीयासो
मस्य चतुर्थ्यदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुता ँ
सप्तमी बृहस्पतेरष्टम्यर्य्यम्णो नवमी धातुर्दश
मीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्यत्रयोद
शी ॥ ॐ इन्द्राग्न्योः पक्षतिः सरस्वत्यै निपक्षति
र्मित्रस्य तृतीया पाञ्चवतुर्थी निर्ऋत्यै पञ्चम्यश्वी
घोमयोः षष्ठी सर्पाणा ँ सप्तमी विष्णोरष्टमी
पूष्णो नवमी त्वष्टुर्दशमी न्द्रस्यैकादशी वरुणस्य
द्वादशी यम्यै त्रयोदशी द्यावापृथिव्योर्दक्षिणं
पार्श्वं विश्वेषान्देवानामुत्तरम् ॥ ॐ नक्षत्रेभ्यः

स्वाहा नक्षत्रेयेभ्यः स्वाहाहोरात्रेभ्यः स्वाहार्द्ध
मासेभ्यः स्वाहा मासेभ्यः स्वाहा ऽऋतुभ्यः स्वा
हार्तवेभ्यः स्वाहा सम्वत्सराय स्वाहा द्यावापृथि
वीभ्या ँ स्वाहा चन्द्राय स्वाहा सूर्याय स्वाहा र
श्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रभ्यः स्वाहादि
त्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः
स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पति
भ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधी
भ्यः स्वाहा ॥ ॐ योगे योगे तवस्तरं वाजेवाजे
हवामहे ॥ सखाय इन्द्रमूतये ॥ ॐ क्राणाशि
शुर्महीना ँ हिन्वन्नृतस्यदीधितम् ॥ विश्वा
परिप्रिया भुवदध्वाँदेता ॥ ॐ सुपर्णः पाजन्यः
आतिवाहसौदर्विदातेवाय्येव बृहस्पतये वाचस्पत
येपैङ्गराजोलजऽआन्तरिक्षाः स्लेवामद्रुमिल्य
स्तेनदीपतये द्यावापृथिवीयः कूर्मः ॥ ॐ आवो
देवासऽईमहे वामम्प्रत्यङ्कूरे ॥ आवो देवासऽ
आशिषो यज्ञियासो हवामहे ॥ ॐ अक्रन्कर्म
कर्मकृतः सहवाचा मयोभुवा ॥ देवेभ्यः कर्म कृ
त्वास्माँतसच्चा भुवः ॥ ॐ अश्वस्तूपरगोमा मृ

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

गस्ते प्राजापत्याः कृष्णग्रीवऽआग्नेयो ररोटपु
रस्तात्सारस्वतीमेष्य धस्ताद्बन्वोराश्विनावधो
रामौ वाह्योः सोमापौष्णः श्यामो नाभ्यां सौ
र्य्यश्यामः श्वेतश्च कृष्णश्च पार्श्वयोस्त्वाष्ट्रो लोमश
सक्थौ सक्थ्यो र्वायव्यः श्वेतः पुच्छऽइन्द्राय स
पस्त्याय वैष्णवो वामनः ॥ ॐ ऋतवस्थऽऋ
तावृधऽऋतुष्ठास्थऋतावृधः ॥ घृतश्चुतो मधु
श्चुतो विराजो नाम कामदुघाऽअक्षीयमाणाः ॥
ॐ ताꣳ सवितुर्वरेण्यस्य चित्रामाहं वृणे सुम
तिं विश्वजन्याम् ॥ यामस्य कण्वोऽअदुहत्प्रपी
नाꣳ सहस्रधाराम्पयसामहीङ्गाम् ॥ ॐ संव
त्सरोसि परिवत्सरोसीदावत्सरोसीद्वत्सरोसि
वत्सरोसि ॥ उषसस्ते कल्पन्तामहोरात्रास्ते क
ल्पन्तामर्द्धमासास्ते कल्पन्तान्मासास्ते कल्पतामृ
तवस्ते कल्पन्ताꣳ सम्वत्सरस्ते कल्पन्ताम् ॥ प्रे
त्याऽएत्यै सञ्चाञ्चप्रसारय ॥ सुपर्णचिदसि
तया देवतयाङ्गिरस्वद्ध्रुवः सीद ॥ ॐ अयम्पु
रो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्चरथौ
जाश्वसेनानी ग्रामण्यो ॥ पुञ्जिकस्थला चक्रतु

स्थला चाप्सरसो दङ्क्षणवः पशवो हीतिः पौरु
षेयो वधः प्रहेतिस्तेभ्यो नमोऽअस्तुतेनोवन्तुते
नो मृडयन्तुतेयन्द्विष्मो यश्चनो द्वेष्टितमेषाञ्ज
म्भेदध्मः ॥ ॐ अक्षराजायकितवंकृतायादि
नवदर्शंत्रेतायैकल्पिनद्वापरायाधिकल्पिनमा
स्कन्दायसभास्थाणुम्मृत्यवेगोव्यच्छमन्तकाय
गोघातङ्क्षुधेयोगांविकृन्तन्तम्भिक्षमाणऽउ
पतिष्ठतिदुष्कृताय चरकाचार्य्यम्मापमनसैत्त
गम् ॥ ॥ इति मासादिपूजा ॥ ॥ अथ दर्प
णपूजा ॥ ॐ समितः सङ्कल्पेथाꣳ सम्प्रियो
रोचिष्णू सुमनस्यमानौ ॥ इषमूर्जमभिसं व
सानौ ॥ संवामनाꣳसि संव्रता समुचितान्या
करम् ॥ अग्ने पुरीक्षाधिपा भवत्वन्नऽइषमू
र्जं यजमानाय धेहि ॥ सिन्दूरस्थालीपूजा ॥
ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेन
क्षत्राणिरूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणा
मुम्मऽइषाण सर्वलोकम्मऽइषाण ॥ ॥
ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनःपूषा वि
श्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्व

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

स्तिनो बृहस्पतिर्दधातु ॥ ॐ पयः पृथिव्या म्य
ऽ ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ॥ प
यस्वतीः प्रदिशः सन्तु मह्यम् ॥ ॐ विष्णोररा
टमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि वि
ष्णो ध्रुवोसि ॥ वैष्णवमसि विष्णवेत्वा ॥ ॐअ
ग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता
वसवो देवता रुद्रा देवता दित्यो देवता मरुतो देव
ता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरु
णो देवता ॥ ॐ द्यौः शान्तिरन्तरि ६ शान्तिः पृ
थिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ व
नस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः
सर्वं ६ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरे
धि ॥ ॥ चतुः स्वस्ति पयः पञ्च षड्विष्णुर्द्वा
दशदेवता ॥ अष्टौ शान्तिः प्रकुर्वीत महापातक
नाशनम् ॥ ॥ धूप ॥ ॐ धूरसि धूर्व धूर्वन्त
धूर्वतं योस्मान्धूर्वति तं धूर्वयं वयं धूर्वामः ॥ ॐ
सम्पूर्णकलशाय साङ्गाय सगणपरिवाराय धूपं
समर्पयामि नमः ॥ दीप ॥ ॐ तेजोसि शुक्र म
स्यमृतमसि धामनामासि प्रियन्देवानामना धृष्ट

न्देवयजनमसि ॥ ॐ सम्पूर्ण कलशाय साङ्गा
य सगणपरिवाराय दीपं समर्पयामि नमः ॥ ॥
नैवेद्य ॥ ॐ अन्नपते अस्यनो देह्यनमीवस्यशु
ष्मिणः ॥ प्रप्रदातार न्तारिषऽ ऊर्जनो धेहिद्वि
पदे चतुष्पदे ॥ ॐ सम्पूर्णकलशाय साङ्गाय स
गणपरिवाराय नैवेद्यं समर्पयामि नमः ॥ फल ॥
ॐ याः फलिनीर्याऽ अफलाऽ अपुष्पा याश्चपु
ष्पिणीः ॥ बृहस्पति प्रसूतास्तानो मुञ्चन्त्व ६ ह
सः ॥ ॐ सम्पूर्ण कलशाय साङ्गाय सगणपरि
वाराय फलं समर्पयामि नमः ॥ ग्राः मसला ॥
ॐ नमः पर्णायचपर्णशदायच नमऽ उद्गुरमा
णायचाभिघ्नते च नमऽ आखिदते च प्रखिदते
च नमऽ इषुकृद्भ्यो धनुष्कृद्भ्यश्चवो नमो न
मोवः किरिकेभ्यो देवाना ६ हृदयेभ्यो नमो वि
चिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽ आनि
र्हतेभ्यः ॥ ॐ सम्पूर्णकलशाय साङ्गाय सगण
परिवाराय ताम्बूलादि मुखशोधनद्रव्याणि स
मर्पयामि नमः ॥ लाजा प्रतिष्ठा ॥ ॐ मनोजूत
र्जुषतामाज्यस्य बृहस्पति र्यज्ञमिमन्तनोत्वरिष्ट

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

यज्ञं हं समिमन्दधातु ॥ विश्वेदेवा स ऽइहमाद
यन्तामो ३ म्प्रतिष्ठ ॥ सुप्रतिष्ठा वरदा भवन्तु ॥
मण्डल ॥ जप ॥ कर्पूर च्यांके ॥ स्रोत्रबोने ॥
मण्डलस्या ॥ ॐ अखण्डमण्डलाकारं व्याप्तं
येन चराचरम् ॥ तत्पदं दर्शितं येन तस्मैश्रीगुं
रवे नमः ॥ कलशाया ॥ ॐ रत्नाम्बुधौ सकलतो
यं जलितपूर्णं स्वच्छं नवपल्लवसुशोभितपुण्यमा
लम् ॥ यज्ञेषु यागविषये मुनिभिः प्रशंसितं तं
कुम्भमूर्तिशिवशक्तियुतं नमामि ॥ सगुणया
॥ ॐ अस्त्वमा वलिर्व्यासो हनुमाँश्चविभी
षणः ॥ कृपः परशुरामश्च सप्तैते चिरजीविनः
मः ॥ क्षत्रपालया ॥ ॐ नित्यानन्दपरं शान्तं
निष्कलङ्कं निरामयम् ॥ व्योमातीतं परंशून्यं
भैरवं तं नमाम्यहम् ॥ गणेशाया ॥ ॐ विघ्ने
श्वराय वीरायविश्वरूपायते नमः ॥ सर्वविघ्न
हरं देवं सर्वशान्तिं नमाम्यहम् ॥ गोमातृकाया
॥ ॐ नमस्ते कपिले देवि नमस्ते सुरपूजिते ॥ प
वित्रां सर्वदा धेनुं पूजितां च नमाम्यहम् ॥ कुमा
रीया ॥ ॐ कौमारी मयूरारूढा रक्ताङ्गी रक्तवा

ससी ॥ शक्त्यक्षवन्दमुद्राच गृह्यश्वरी न
मोस्तुते ॥ इष्टदवता आदिया ॥ ॐ इष्टदेवन
मस्तुभ्यं कुलदेव नमोनमः ॥ स्थानदेव ग्रहाः
सर्वे पूजां गृह्ण प्रसीदमे ॥ यथा वाणप्रहाराणां
कवचं भवति वारणम् ॥ तद्वद्देवविघातानां शा
न्तिर्भवतु वारणम् ॥ अत्र गन्धार्चनाविधौ तत्स
र्वं विधिर्पारपूर्णमस्तु ॥ ॥ यजमानं कलशपू
जायाये ॥ अद्य ॐ तत्सत् विष्णुः ३ ॥ नमोस्तु
नन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबा
हवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटि
युगधारिणे नमः ॥ मासानामुत्तमे मासेऽत्या
दि ॥ काश्यपगोत्रस्य यजमानस्य ..... नामधे
यस्य मम ..... स्य ..... कर्मणि यथाशक्ति क
लशपूजां कर्तुं श्रीसूर्यायार्घ्यं नमः ॥ ॐ मोहा
न्धकार मग्नानां जनानां ज्ञानरश्मिभिः ॥ कृतमु
द्धरणं येन तन्नौमि शिव भास्करम् ॥ भास्कर
य इदमासनं नमः ॥ पुष्पं नमः ॥ धूपं नमः ॥
मण्डल दयेका पूजा याये ॥ ॐ अखण्डमण्डु
लाकारं व्याप्तं येन चराचरम् ॥ तत्पदं दर्शितं

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

येन तस्मै श्रीगुरवे नमः ॥ स्वांङ्ग्ये मण्डलस्य
का लाहासिले ॥ न्यास ॥ लः थल पूजा ॥ ॐ
ब्रह्मणे नमः ॥ विष्णवे नमः ॥ रुद्राय नमः ॥
ईश्वराय नमः ॥ सदाशिवाय नमः ॥ वरुणमू
र्तिये चन्दनाक्षतपुष्पं नमः ॥ धेनुमुद्रां दर्शये
त् ॥ आत्मपूजा ॥ आत्मने सिञ्च्वनं नमः ॥
आत्मने चन्दनं नमः ॥ आत्मने पुष्पं नमः ॥
आत्मासनाय नमः ॥ आत्ममूर्तये नमः ॥ क
लश पूजा ॥ ॐ सम्पूर्ण कलशाय मृत्युञ्जया
य अमृतेश्वरी शक्ति सहिताय साङ्गाय सगणप
रिवाराय इदमासनं नमः ॥ पुष्पं नमः ॥ पादा
र्घ्यं नमः ॥ हस्तार्घ्यं नमः ॥ प्रत्यर्घ्यं नमः ॥ चन्द
नं नमः ॥ सिन्दूरं नमः ॥ अक्षतान्नमः ॥ य
ज्ञोपवीतं नमः ॥ पुष्पं नमः ॥ धूपं नमः ॥ दी
पं नमः ॥ नैवेद्यं नमः ॥ पक्वान्नं नमः ॥ फलं
नमः ॥ ताम्बूलादि मुखशोधनद्रव्याणि सम
र्पयामि नमः ॥ इदं फलपुष्प धूपदीप नैवेद्या
दिसंकल्पसिद्धिरस्तु ॥ मण्डल जपस्तोत्र ॥
ॐ अखण्डमण्डलाकारं व्याप्तंयेन चराचर

म् ॥ तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
रत्नौषधीसकलतीर्थ जलेन पूर्णम् इत्यादिफुक
देवयास्तुति ६६ पत्रे चौथे वोने ॥ अत्रमन्त्रार्च
नविधौ तत्सर्वं विधिर्पारपूर्णमस्तु ॥ मण्डलया
स्वांङ्ग्ये ॥ मण्डलस्यंकालाहासिले ॥ ब्राह्मणपू
जायाये ॥ ॐ यजुर्वेदाध्यायिने ब्राह्मणाय इ
दमासनं नमः ॥ पुष्पं नमः ॥ हस्तार्घ्यं नमः ॥ प्र
त्यर्घ्यं नमः ॥ चन्दनं नमः ॥ सिन्दूरं नमः ॥ अ
क्षतान्नमः ॥ सयज्ञोपवीतपुष्पं नमः ॥ धूपं न
मः ॥ दीपं नमः ॥ अन्नसंकल्प ॥ जाकिलः
कया बैंतोते ॥ यजुर्वेदाध्यायिने ब्राह्मणायय
थादीयमान अन्नसंकल्पसिद्धिरस्तु ॥ जोशी
दुसा ॥ नन्दिकेश्वराय चन्दनं नमः ॥ सिन्दूरं
नमः ॥ अक्षतान्नमः ॥ यज्ञोपवीतपुष्पं नमः ॥
आचाजुदुसा ॥ आचाराय चन्दनं नमः ॥ सि
न्दूरं नमः ॥ अक्षतान्नमः ॥ यज्ञोपवीतपुष्पं
नमः ॥ सकसितं निसलाविये ॥ लः हतुलुबैं
तये ॥ अन्नसंकल्प अस्तुद्रमस्तु ॥ पूजायाये ॥
अन्नसंकल्पपूजाविधानं तत्सर्वं विधिर्पारपूर्ण

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

मस्तु ॥ ॥ अथ शान्तिक पुष्टिक ॥ यजमानं ब्राह्मणयातः दाफोस्वां ३ आरब्ये विये ॥ ॐ शान्तिरस्तु ॥ हाकनं अथेहेविये ॥ ॐ पुष्टिरस्तु ॥ अनंलि ब्राह्मणं यजमानयातः अथेहे दाफोस्वां आरब्ये निकः विये ॥ ॐ शान्तिरस्तु ॥ ॐ पुष्टिरस्तु ॥ निह्मसिनं विन्तियाये ॥ ब्राह्मणं शान्तिक पुष्टिकया वेद बोने ॥ ॥ ॐ स्वस्तिनो मिमीतामश्विना भगः स्वस्तिदेव्यदितिरनर्वणः ॥ स्वस्तिपूषाऽअसुरदधातुनः स्वस्तिद्यावापृथिवीसुचेतुना ॥ स्वस्तयेवायुमुपब्रवामहेसोमं स्वस्तिभुवनस्ययस्पतिः ॥ बृहस्पतिं सर्वगणंस्वस्तयेस्वस्तयऽआदित्यासो भवन्तुनः ॥ विश्वेदेवानोऽअद्यास्वस्तयेवैश्वानरोवसुरग्निः स्वस्तये ॥ देवाऽअवंस्तृभवः स्वस्तयेस्वस्तिनोरुद्रः पात्वंहसः ॥ स्वस्तिमित्रावरुणास्वस्तिपथ्येरेवति ॥ स्वस्तिनऽइन्द्रश्चाग्निश्चस्वस्तिनोऽअदितेकृधि ॥ स्वस्तिपन्थामनुचरेमसूर्याचन्द्रमसाविव ॥ पुनर्ददताघ्नता जानतासंगमेमहि ॥ पारिशिष्टम् ॥ स्वस्त्ययनंतार्क्ष्यमरिष्टनेमिंसहद्भूतंवायसंदेवतानाम् ॥ असुरघ्नमिन्द्रसखंसमत्सुबृहद्यशोनावमिवारुहेम ॥ अंहोमुचमंगिरसंगयंचस्वस्त्यात्रेयंमनसाचतार्क्ष्यम् ॥ प्रयतपाणिःशरणंप्रपद्येस्वस्तिसंबाधेष्वभयंनोऽअस्तु ॥ ॥ ॐ कनिक्रदज्जनुषंप्रब्रुवाणऽइर्यतिवाचमरितेवनावम् ॥ सुमङ्गलश्चशकुनेभवासिमात्वाकाचिदभिभाविश्व्याविदत् ॥ मात्वाश्येनऽउद्वधीन्मासुपर्णीमात्वाविददिषुमान्वीरोऽअस्ता ॥ पित्र्यामनुप्रदिशंकनिक्रदत्सुमङ्गलोभद्रवादीवदेह ॥ अवक्रन्ददक्षिणतोगृहाणांसुमङ्गलोभद्रवादीशकुन्ते ॥ मानःस्तेनऽईशतमाघशंसोबृहद्वदेमविदथेसुवीराः ॥ प्रदक्षिणिदभिगृणन्तिकारवोवयोवदन्तऽऋतुथाशकुन्तयः ॥ उभेवाचौवदतिसामगाऽइवगायत्रंचत्रैष्टुभंचानुराजति ॥ उद्गातेवशकुनेसामगायसिब्रह्मपुत्रऽइवसवनेषुसंशसि ॥ वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकुनेभद्रमावद विश्वतोनःशकुनेपुण्यमावद ॥ आवदंस्त्वंशकुनेभद्रमावदतूष्णीमासी

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

नः सुमतिं चिकिद्धिनः ॥ यदुत्पतन्वदसिः क
र्करिर्यथा बृहद्वदेम विदथे सुवीराः ॥ भद्रं वद
दक्षिणतो भद्रमुत्तरतो वद ॥ भद्रं पुरस्तान्नो व
द भद्रं पश्चात्कपिञ्जल ॥ भद्रं वद पुत्रैर्भद्रं व
द गृहेषु च ॥ भद्रमस्माकं नो वद भद्रं नो ऽअ
भयं कृधि ॥ भद्रमधस्तान्नो वद भद्रमुपरिष्टा
न्नो वद ॥ भद्रं भद्रं नऽआवद भद्रं नः सर्वतोव
द ॥ असपत्नः पुरस्तान्नः शिवं दक्षिणतस्कृ
धि ॥ अभयं सततं पश्चाद्भद्रमुत्तरतो गृहे ॥ यो
वनानि महयसि जिग्युषामिव दुन्दुभिः ॥ शकु
तक प्रदक्षिणं शतपत्राभिनो वद ॥ ॐ आवदं
स्त्वं शकुने भद्रमावद तूष्णीमासीन सुमतिं चिकि
द्धिनः ॥ यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम
विदथे सुवीराः ॥ ॐ यज्जाग्रतो दूरमुदैति दैवं
तदु सुप्तस्य तथैवैति ॥ दूरङ्गमं ज्योतिषां ज्यो
तिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु ॥ ॐ सहस्र
शीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ सभूमिः
सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ ॐ आशुः शि
शानो वृषभो नभीमो घनाघनः क्षोभणश्चर्षणी

नाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीरः शतः
सेनाऽअजयत्साकमिन्द्रः ॥ ॐ विभ्राड्बृहत्
पिबतु सोम्यध्वर्युर्दधज्ञपतावविहुतम् ॥
वातजूतोयोऽअभिरक्षतित्मनाप्रजाः पुपोषपु
रुधाविराजति ॥ ॐ नमस्तेरुद्रमन्यवऽउतोतऽ
इषवेनमः बाहुभ्यामुतेनमः ॥ ॐ स्वधेते रुद्र
भागः सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषते रु
द्रभागऽआखुस्तेपशुः ॥ ॐ वयः सोमव्रतेत
वमनस्तनूषुविभ्रतः ॥ प्रजावन्तः सचेमहि ॥
ॐ स्वधेते रुद्रभागः सहस्वस्राम्बिकयातञ्जुष
स्वस्वाहैषते रुद्रभागऽआखुस्तेपशुः ॥ अवरु
द्रमदीमह्यवदेवं त्र्यम्बकम् ॥ यथानोवस्यसस्क
रद्यथानःश्रेयसस्करद्यथानो व्यवसाययात् ॥ भे
षजमसि भेषजङ्गवेश्वायपुरुषाय भेषजम् ॥
सुखम्मेषायमेष्ये ॥ त्र्यम्बकं यजामहे सुगन्धि
म्पुष्टिवर्द्धनम् ॥ उर्वारुकमिववन्धनान्मृत्योर्मुक्षी
यमामृतात् ॥ त्र्यम्बकं यजामहे सुगन्धिम्पतिवे
दनम् ॥ उर्वारुकमिववन्धनादितोमुक्षीयमा मु
तः ॥ एतत्तेरुद्रावसन्तेन परोमूजवतोतीहि ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

अवतत धन्वा पिनाकावसः कृत्तिवासा ऽअ
हि ꣳसन्नः शिवोतोहि ॥ त्र्यायुष ञ्जमदग्नेः
कश्यपस्य त्र्यायुषम् ॥ यद्देवेषु त्र्यायुषन्नो
ऽअस्तु त्र्यायुषम् ॥ शिवो नामासि स्वधिति
स्तेपितानमस्ते ऽअस्तुमामाहि ꣳसीः ॥ निव
र्तया म्यायुषेन्नाद्यायप्रजननाय रायस्पोषा
यसुप्रजास्त्वाय सुवीर्याय ॥ ॥ ॐ स्वस्तिनऽ
इन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः ॥ स्वस्ति
नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्द
धातु ॥ पयः पृथिव्याम्पयऽओषधीषुपयोदि
व्यन्तरिक्षेमयोधाः ॥ पयस्वतीः प्रदिशः स
न्तुमह्यम् ॥ विष्णोरराटमसिविष्णोः श्नप्त्रे
स्थो विष्णोः स्यूरसिविष्णो ध्रुवोसि ॥ वैष्णव
मसिविष्णवेत्वा ॥ अग्निर्देवता वातोदेवता सू
र्यो देवता चन्द्रमा देवता वसवो देवता रुद्रादेवता
दित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्प
तिर्देवतेन्द्रोदेवता वरुणो देवता ॥ द्यौः शान्तिर
न्तरिक्ष ꣳशान्तिः पृथिवीशान्तिरापः शान्तिरो
षधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः

शान्तिर्ब्रह्मशान्तिः सर्व ꣳशान्तिः शान्तिरेव शा
न्तिः सामाशान्तिरेधि ॥ ॐ त्र्यम्बकं यजामहे
सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिववन्धना न्मृ
त्योर्मुक्षीयमामृतात् ॥ त्र्यम्बकं यजामहे सुगंधि
म्पतिवेदनम् ॥ उर्वारुकमिववन्धनादितोमुक्षी
यमामुतः ॥ ॥ चतुः स्वस्तिपथः पञ्चब्रह्मषड्वि
ष्णुद्वीदशदेवता ॥ अशेषशान्तिः प्रकुर्वीत महा
पातकनाशनम् ॥ ॥ यजमानयाके चोनगुनं
थवेकेचोनगुनं आरेघ्यनं पूजायाये ॥ खांजकव
ह्नियजमानंघुये ॥ वह्नि कर्मयायेया मन्वाया
तःल्यंकातये ॥ लिपावियेय ॥ ॥ थनविशेष
कर्मयाये ॥ अनंलि कौमारीहया देवदक्षिणा
॥ दीपनारायणाय यथाशक्ति दक्षिणां तुभ्यम
हं सम्प्रदे ॥ गणेशाय यथाश० ॥ सम्पूर्णकल
शाय यथाश० ॥ कौमार्यै यथाश० ॥ इत्यादि ॥
ब्राह्मणदक्षिणा ॥ यजुर्वेदाध्यायिने ब्राह्मणा
य यथाश० ॥ जोशी आचारदतसानं विये ॥
दक्षिणा हाय हाय थास दकमनं पूजायाये ॥ य
था श्रद्धार्चन विधौ तत्सर्वं विधिपरिपूर्णमस्तु ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

यजमानं ब्राह्मणयात: ल: थलस्वा विया धा
ये ॥ स्वस्ति भवतु मे ब्रुवताम् ॥ ब्राह्मणं ॐ
स्वस्ति धका कार्ये ॥ ब्राह्मणं कलशे स्वांतना
देवाशीर्वाद विये ॥ ॐ त्र्यम्बकं यजामहेसु
गन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिव बन्धना
न्मृत्योर्मुक्षीयमामृतात् ॥ त्र्यम्बकं यजामहे
सुगन्धिम्पतिवेदनम् ॥ उर्वारुकमिव बन्धना
दितोमुक्षीयमामुत: ॥ ॐ ब्रह्मजज्ञानंप्रथ
मम्पुरस्ताद्विसीमत: सुरुचोवेन ऽ आव: ॥ स
बुध्न्या ऽ उपमा ऽ अस्यविष्ठा: सतश्चयोनि
मसतश्चविव: ॥ ॐ इदं विष्णुर्विचक्रमे त्रे
धानिदधे पदम् ॥ समूढमस्यपा छ सुरे ॥ ॐ
नम: शम्भवायच मयोभवायच नम: शङ्क
रायच मयस्करायच नम: शिवायच शिवत
रायच ॥ ॐ अम्बे ऽ अम्बिकेम्बालिकेनमा
नयतिकश्चन: ॥ ससस्त्यश्वक: सुभद्रिकांकां
पीलवासिनीम् ॥ ॐ आजिघ्रकलशं मह्यात्वा
विशन्त्विन्दव: ॥ पुनरूर्जानिवर्तस्वसान: सह
स्रन्धुक्ष्वोरु धारापयस्वतीपुनर्मा विशताद्रयिम् ॥

कलशादिविसर्जन ॥ उद्वयन्तमसस्परिस्व: प
श्यन्त ऽ उत्तरम् ॥ देवन्देवत्रा सूर्यमगन्मज्योति
रुत्तमम् ॥ ॥ कलशाया जल सर्गं वौ सिद्ध: स्वां
कुमारी आदि देवतापिन्त: भागतंय ॥ ब्राह्मणपि
नि जल आदि प्रसाद कार्ये ॥ ॐ ब्रह्मणस्पेतत्वम
स्ययन्तासूक्तस्य बोधितनयञ्जिन्व ॥ विश्वं
तद्भद्रंयदवन्तिदेवा बृहद्वदेमविदथेसुवीरा: ॥
यजमानपिन्त: कलशाया जल विये ॥ ····कर्म
नैमित्तिक कलशार्चन कृतसम्पूर्णार्थम् अभिषे
कसुमुहूर्तमस्तु ॥ ॐ देवस्यत्वासवितु: प्रसवे
श्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ अश्विनोर्भै
षज्येनतेजसे ब्रह्मवर्चसायाभिषिञ्चामि स
रस्वत्यैभैषज्येनवीर्य्यायान्नाद्यायाभिषिञ्चा
मीन्द्रस्येन्द्रियेण बलायश्रियै यशसेभिषिञ्चा
मि ॥ चन्दनतिके ॥ ॐ यदद्यकच्चवृत्रहन्नुदगा
ऽ अभिसूर्य ॥ सर्वं तदिन्द्रतेवशे ॥ तरणिर्विश्व
दर्शतो ज्योतिष्कृदसिसूर्य ॥ विश्वमाभासिरोच
नम् ॥ सिन्दूरतिके ॥ ॐ त्वंन्यविष्ठदाशुषेनृ:
पाहि शृणुधी गिर: ॥ रक्षातोकमुतत्त्मना ॥ ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

सगंधौतिके ॥ ॐ दधिक्राव्णोऽअकारिषंजि
ष्णोरश्वस्य वाजिनः ॥ सुरभिनोमुखाकरत्
प्रणऽआयूंषितारिषत् ॥ मालको आ
शीर्वादविये ॥ न्यासलीन ॥ सूर्यसाक्षी ॥
.... गोत्रस्य यजमानस्य .... स्य .... कर्म
नैमित्तिक कलशार्चन कृत सम्पूर्णार्थं कृत
कर्मसाक्षिणे श्रीसूर्यायार्घ्यं नमः ॥ पुष्पंन
मः ॥ प्रार्थना ॥ आवाहनं न जानामिनजा
नामि विसर्जनम् ॥ पूजां चैव न जानामि क्ष
मस्व परमेश्वर ॥ ॥ कायेन वाचा मनसे
न्द्रियैर्वा बुद्ध्यात्मना वानुसृत स्वभावात् ॥ क
रोमि यद्यत्सकलं परस्मै नारायणायेति सम
र्पयेत्तत् ॥ ॥ तत्सर्वं कृष्णार्पणमस्तु ॥ ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञ क्रियादि
षु ॥ न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्यु
तम् ॥ ॥ ॐ अच्युताय नमः ॥ ॥

॥ इति कलशार्चनम् ॥

अथ नामकरणम् ॥ कलशार्चन यांये ॥ सामग्री त
यार यांये ॥ यजमानं आचमन याना चन्दन तिये
खान हुंये ॥ तिलकुशजलिकया संकल्प यांये ॥ ॥
अद्यादि ॥ देशकाल कीर्तन २५ पत्रेचोथे बोने ॥ ॥
.... गोत्रस्य यजमानस्य .... नाम्नो मम .... स्य
नामावधारण घृतप्राशन निमित्तक कलशार्चनं ब्रा
ह्मणद्वारा अहं कारयिष्ये ॥ तत्कर्म कर्तुं भगवंतंश्री
सूर्यायार्घ्यं नमः ॥ पुष्पं नमः ॥ ॐ मोहान्धकारस
ग्रानां जनानां ज्ञानरश्मिभिः ॥ कृतमुद्धरणं येन त
न्नौमि शिव भास्करम् ॥ भास्कराय धूपं नमः ॥ पू
जामः लःथल ब्राह्मणं लव ह्लानो काय् धुनेवं विधिर्थं
कुलशपूजा यांये ॥ सगुणपूजा धुनेवं विशेषपूजा
यांये ॥ दिदिवलिया ॥ ॐ जातोऽद्दिष्ट देवतायेइद
मासनं नमः ॥ पुष्पं नमः ॥ वेदः ॥ ॐ अक्रन्कर्म्मक
र्म्मकृतः सहवाचामयो भुवा ॥ देवेभ्यः कर्म्मकृत्वा
स्तम्प्रेतसचा भुवः ॥ जन्मपत्रिकास नां चोया पूजा
यांयें ॥ ॐ जन्मपत्रिकायेइदमासनं नमः ॥ पुष्पं
नमः ॥ वेदः ॥ ॐ ताऽअस्य सूददोहसः सोम ॐ
श्रीणन्तिपृश्नयः ॥ जन्मन्देवानां विशस्त्रिष्वारोचने

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu